## वृद्धाट्ठक् सौवीरेषु बहुलम्। (१४८/११७२)

कुत्सने इत्येव। सौवीरेषु इति प्रकृतिविशेषणम्। वृद्धात् सौवीरगोत्रादपत्ये बहुलं ठक् प्रत्ययो भवति कुत्सने गम्यमाने। भागवित्तेः[1] भागवित्तिकः। [2]तार्णबिन्दवस्य तार्णबिन्दविकः। पक्षे [3]यथाप्राप्तं फक्, भागवित्तायनः। पक्षे तार्णबिन्दविः। अकशापः [4]शुभ्रादिः, आकशापेयः। तस्यापत्यम् आकशापेयिकः। पक्षे आकशापेयिः।

भागपूर्वपदो वित्तिर्द्वितीयस्तार्णबिन्दवः।
तृतीयस्त्वाकशापेयो गोत्राट् ठग् बहुलं ततः॥

वृद्धग्रहणं स्त्रीनिवृत्त्यर्थम्। सौवीरेषु इति किम्? औपगविर्जाल्मः। कुत्सने इत्येव, भागवित्तायनो माणवकः। बहुलग्रहणमुपाधिवैचित्र्यार्थम्। गोत्रस्त्रियाः इत्यारभ्य चत्वारो योगास्तेषु प्रथमः कुत्सन एव, अन्त्यः सौवीर[5]गोत्र एव, मध्यमौ [6]द्वयोरपि। तदेतद् बहुलग्रहणाल्लभ्यते॥

## फेश्छ च। (१४९/११७३)

कुत्सने इत्येव, सौवीरेषु इति च। फेः इति फिञो ग्रहणं न फिनः, वृद्धाधिकारात्। फिञन्तात् [7]प्रातिपदिकात् सौवीरगोत्रादपत्ये छः प्रत्ययो भवति, चकाराट् ठक्, कुत्सने गम्यमाने। यमुन्दस्यापत्यं, '[8]तिकादिभ्यः फिञ्' (४.१.१५४/११७८)। तस्यापत्यं यामुन्दायनीयः, यामुन्दायनिकः। कुत्सने इत्येव, यामुन्दायनिः। फिञन्तादौत्सर्गिकस्याण आगतस्य 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२.४.५८/१२७६) इति लुक्। सौवीरेषु इत्येव, तैकायनिः।

यमुन्दश्च सुयामा च [9]वार्ष्यायणिः फिञः स्मृताः।
सौवीरेषु च कुत्सायां द्वौ योगौ शब्दवित् स्मरेत्॥

## फाण्टाहृतिमिमताभ्यां णफिञौ। (१५०/११७४)

सौवीरेषु इत्येव। कुत्सने इति निवृत्तम्। फाण्टाहृतिमिमतशब्दाभ्यां सौवीरविषयाभ्यामपत्ये णफिञौ प्रत्ययौ भवतः। फकोऽपवादः। अल्पाच्तरस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नं, [10]तेन यथासङ्ख्यमिह न भवति इति। फाण्टाहृतः, फाण्टाहृतायनिः (म.भा. २.२६१)। मैमतः, मैमतायनिः। सौवीरेषु इत्येव, फाण्टाहृतायनः। मैमतायनः। फाण्टाहृतेः 'यञिञोश्च' (४.१.१०१/११०३) इति फक्। मिमतशब्दो[11]ऽपि नडादिषु पठ्यते॥

## कुर्वादिभ्यो ण्यः। (१५१/११७५)

सौवीरेषु बहुलम् इति निवृत्तम्। कुरु इत्येवमादिभ्यः शब्देभ्योऽपत्ये ण्यः प्रत्ययो भवति। कौरव्यः। गार्ग्यः। 'कुरुनादिभ्यो ण्यः' (४.१.१७२/११९०) इति कुरुशब्दादपरो ण्यप्रत्ययो भविष्यति। स तु क्षत्रियात् तद्राजसञ्ज्ञकः। तस्य बहुषु लुका भवितव्यम्, अयं तु श्रूयत एव। कौरव्याः। कौरव्यशब्दस्य क्षत्रियवचनस्य तिकादिषु पाठात् फिञपि भवति, कौरव्यायणिः। रथकारशब्दोऽत्र पठ्यते, स जातिवचनः। त्रैवर्णिकेभ्यः किंचिन्न्यूना रथकारजातिः। कारिणस्तु रथकारशब्दादुत्तरसूत्रेणैव ण्यः सिद्धः। केशिनीशब्दः पठ्यते, तस्य कैशिन्यः। पुंवद्भावो न भवति, स्त्रीप्रत्ययनिर्देशसामर्थ्यात्।

---

1. अपत्यं इत्यधिकम् फ. 2. तार्णबिन्दवस्य नास्ति फ. 3. यथाप्राप्तः फ. 4. शुभ्रात् इत्यतः ढकि फ. 5. गोत्रे नास्ति फ. 6. सौवीरेषु कुत्सायां च क.ड. 7. प्रातिपदिकात् नास्ति फ. 8. यामुन्दायनिः इत्यधिकम् फ. 9. वाष्यायणिः ब. 10. तेन नास्ति ब. 11. अपि नास्ति ब.